BRAHMASŪTRABHĀSYA-SIDDHĀNTASAṀGRAHA

ALIAS

BRAHMASŪTRA-BRAHMATĀRA-SIDDHĀNTAVIVRTI

BY

S'RĪ UPANISADBRAHMAYOGIN

EDITED BY

PANDIT V KRISHNAMACHARYA

THE ADYAR LIBRARY

1949

PRELIMINARY NOTE

S'RĪ UPANISADBRAHMAYOGIN is known to have lived very recently at Kanchipuram, Madras, presiding over the Upanisad-brahmamatha of the place He mentions himself as a disciple of Vāsudevendrayogin He has written commentaries on all the Upanisads in accordance with the Advaitic view of S'rī S'amkarācārya These commentaries have been published in the Adyar Library Series in Nos 6 to 10, 12, 14 and 15 in previous years The work now published is called the *Brahmasūtra bhāsya siddhānta samgraha* or *Brahmasūtra-brahmatāra-sidhānta vivrti* This also is said to have been written by the same author

He attempts herein to show that the Brahmasūtras and S'rī Samkara's Bhāsya thereon teach the same truth as contained in the Tāramantra or Pranava For this purpose he seems to have taken the Nādabindūpanisad as well as the Māndūkyopanisad with Gaudapāda's Kārikās thereon as the guide Assuming that the Tāramantra is divided into four parts *namely* Akāra, Ukāra, Makāra and Ardhamātrā, he assigns to them the following terms—Sthūla or Virāt, Sūksma or Sūtra, Bīja and Turya He again assigns the very same terms to the four adhyāyas of the Brahmasūtras widely known as of Samanvaya, Avirodha, Sādhana and Phala and also to the four pādas of each of the four adhyāyas said above Thus he calls the 1st pāda of the 1st adhyāya as Virāt Virāt, the 2nd pāda as Virāt Sūtra, the 3rd pāda as Virāt-Bīja, and the 4th pāda as Virāt-Turya Likewise the pādas of the 2nd adhyāya are called as Sūtra Virāt, Sūtra Sūtra, Sūtra Bīja and Sūtra Turya In the same manner the remaining two adhyāyas also are called with the terms Bīja and Turya After designating thus the various adhyāyas and pādas the author gives a

brief summary of each of the adhikaranas in all the sixteen pādas with certain abbreviations This is the significance of the work In regard to the division of adhikaranas, the author differs from S'ri S'amkara in one or two instances Such instances are traceable in the 3rd pāda of the 1st adhyāya and the 1st pāda of the 3rd adhyāya But he strictly follows S'rī S'amkara in stating that the total number of adhikaranas is 192 and that of the Sūtras is 555 From the last stanza found at the end it is understood that the author has written a commentary on this work containing 3500 Granthas

With reference to the authorship of the work the text mentions two names *viz* Rāmacandrendra and Upanisad-brahmayogin at the end It is natural to doubt whether these names denote one and the same person or two distinct ones Two sets of works, one ascribing the authorship to Ramacandrendra and the other to Upanisadbrahmayogin, are available in the libraries Perhaps this question must have been raised when the Bhagavadgītārthaprakās'ikā by Rāmacandrendra was published in the Adyar Library Series No 25 in 1941 with the authorship of Upanisadbrahmayogin and solved probably on conclusion that these two names were synonymous

At the end of the text a table of contents is appended It uses the same abbreviations found in the text and adds the relevant adhikaranasūtras in each case so as to make the text understandable The author of this table is mentioned as Rāmacandrendra Certain new terms have been given to the pādas of the 2nd, 3rd and 4th adhyāyas In the 2nd adhyāya the pādas have been called as Bindu, Nāda, Kalā and Kalātīta In the 3rd adhyāya they have been called as S'ānti, S'āntyatīta, Unmanī and Manonmanī In the 4th adhyāya they have been called as Purī or Vaikharī, Madhyamā, Pasyanti and Parā

The publication is based on a single MS deposited in the Adyar Library, Madras

V KRISHNAMACHARYA

ब्रह्मसूत्रभाष्यसिद्धान्तसंग्रहः

अथवा

ब्रह्मसूत्रब्रह्मतारसिद्धान्तविवृतिः

समन्वयाध्यायः

यत्राकारादिपश्यन्तीमात्रापञ्चदशेश्वरा ।
सूच्यन्ते तद्ब्रह्मसूत्राखण्डार्थं त्रैपदं भजे ॥ १ ॥
नत्वा श्रीदेशिक ब्रह्मतारार्थानन्दमिच्छताम् ।
तत्सिद्धिसुलभोपायब्रह्मसूत्रार्थ उच्यते ॥ २ ॥
विराड्विराडादितुर्यबीजान्तकलनास्पदम् ।
नत्वा ब्रह्म ब्रह्मतारब्रह्मसूत्रार्थ उच्यते ॥ ३ ॥
तत्तारो ब्रह्मसूत्र स्याद्यत्र ब्रह्मेह सूच्यते ।
तारमात्रा अकाराद्याश्चतुरध्यायता गता. ॥ ४ ॥
आद्य· समन्वयोऽकार उकारो ह्यविरोधकृत् ।
मकार· साधनाध्यायः फलाध्यायोऽर्धमात्रकः ॥ ५ ॥
अभिधात्रभिधेयैक्याद् द्व्यष्टपादा भवन्ति ते ।
प्रतिपादैकवाच्या स्युर्विराड्वैश्वानरादय ॥ ६ ॥
उक्तषोडशपादाना लक्ष्यं तुर्यतुरीयचित् ।
तत्र नामाधिकरणसिद्धान्तार्थालिसग्रह. ॥ ७ ॥

कर्तव्यं ब्रह्मजिज्ञासा ब्रह्मविद्याण्डकारणम् ।
तच्छास्त्रकृत्त्वात्सर्वज्ञ यद्वा शास्त्रप्रमाणकम् ॥ ८ ॥
ब्रह्मात्मनिष्ठा वेदान्ता ब्रह्मण्यवसिता अथ ।
सन्मात्रमानन्दमयो ब्रह्मपुच्छं प्रधानत ॥ ९ ॥
हिरण्मय पुष्करमसुज्योतिः प्राण. पराक्षरम् ।
विराड्विराट्पद त्वेकादशाधिकरणात्मकम् ॥ १० ।

इति प्रथमस्याध्यायस्य प्रथमः पादः ।

अस्पष्टोपास्यवैराजसूत्रपादार्थ उच्यते ।
मनोमयोऽत्ता चात्मैव गुहास्थाववरेश्वरौ ॥ ११ ॥
अक्षिस्थोऽन्तर्यामिभूतयोनिर्वैश्वानरश्च चित् ।
वैराजसूत्रपादोऽय सप्ताधिकरणात्मकः ॥ १२ ॥

इति प्रथमस्याध्यायस्य द्वितीयः पादः ।

ज्ञेयतात्वेन वैराजबीजपादार्थ उच्यते ।
द्युभ्वाद्याधारभूमा चाक्षर परपूरुषः ॥ १३ ॥
आकाशोऽक्षिस्थपुरुषस्तेजोऽङ्गुष्ठाकृती च चित् ।
विद्याधिकारो देवाना शूद्रोऽधिक्रियते न च ॥ १४ ॥
प्राणो ज्योतिस्तथाकाशः प्राणवाग्वेद्यमक्षरम ।
चतुर्दशाधिकरणं विराड्बीजपद भवेत् ॥ १५ ॥

इति प्रथमस्याध्यायस्य तृतीयः पादः ।

पादमात्रार्धवैराजतुर्यपादार्थ उच्यते ।
वपुरव्यक्तमाख्यातं तेजोऽबन्नात्मिका ह्यजा ॥ १६ ॥
प्राणादिपञ्चकं पञ्चजनशब्देन विश्रुतम् ।
सार्धैस्त्रिभिः पदैरुक्तो वेदान्तानां समन्वयः ॥ १७ ॥
वेदितव्यः परश्चात्मशब्दो ब्रह्मात्मबोधकः ।
निमित्तोपादानहेतुर्विश्वहेतुः पराक्षरम् ॥ १८ ॥
वैराजतुर्यपादोऽयमष्टाधिकरणात्मकः ।

इति प्रथमस्याध्यायस्य चतुर्थः पादः ।

अथाविरोधाध्यायः

स्मृतिकर्त्रविरोधेन सूत्रविश्वपदुच्यते ॥ १९ ॥
साङ्ख्ययोगस्मृतिभ्यां न वेदः संकोचमर्हति ।
ब्रह्मजन्यं जगद्वेदः काणादाद्यैर्न बाध्यते ॥ २० ॥
नाद्वैतबाधको भेदो मायातो जगदीशधीः ।
ईशो न दोषभाक्सर्वस्रष्टृ ब्रह्माद्वयात्मकम् ॥ २१ ॥
चितो न परिणामोऽस्ति ब्रह्म मायानुकारवत् ।
प्रयोजनमृते स्रष्टृ नोन्मत्त समतोज्ज्वलम् ॥ २२ ॥
निर्गुणब्रह्मचैतन्यमपि प्रकृतिकारणम् ।
त्रयोदशाधिकरणं सूत्रविश्वपदं भवेत् ॥ २३ ॥

इति द्वितीयस्याध्यायस्य प्रथमः पादः ।

अन्यदुष्टपदे सूत्रसूत्रपादार्थ उच्यत ।
न प्रधान जगद्धेतु सृष्टावस्ति निदर्शनम् ॥ २४ ॥
अणुभ्यो न जगज्जन्म न तत्सृष्टान्न योगत ।
ज्ञानस्कन्धो नैव युक्तो भङ्ग्या सप्तार्थता न हि ॥ २५ ॥
ताटस्थ्यवादो नो युक्तो जीवोत्पत्तेरसभवात् ।
सूत्रसूत्रात्मक पादस्त्वष्टाधिकरणात्मक· ॥ २६ ॥

इति द्वितीयस्याध्यायस्य द्वितीय पाद

भूतबीजाविरोधार्थसूत्रबीजपदुच्यते ।
ब्रह्मसृष्टौ व्योमवायू सतो जन्माप्यसभव· ॥ २७ ॥
वाय्वादितापन्नचितस्तेजोऽबन्नजनि क्रमात् ।
सोपाधिकस्य कर्तृत्व सृष्टेर्व्युत्क्रमतो लय ॥ २८ ॥
सृष्टौ न क्रमभङ्ग स्याद्वपुषो जन्मनाशता ।
जीवो नोत्पद्यते जातु स चिदश, स वै विभु ॥ २९ ॥
जीव· कर्तैव कर्तृत्वमध्यस्त तन्नियन्तृ चित् ।
चिदा जगद्व्यवस्थापि युज्यते व्यावहारिकी ॥ ३० ॥
सप्तदशाधिकरणं सूत्रबीजपदं भवेत ।

इति द्वितीयस्याध्यायस्य तृतीय पाद. ।

लिङ्गश्रुत्याविरोधार्थसूत्रतुर्यपदुच्यते ॥ ३१ ॥
ब्रह्मणोऽक्षाणि जायन्ते चाक्षाण्येकादशैव हि ।
तानि मध्यममानानि प्राणोऽक्षमिव जायते ॥ ३२ ॥

प्राणस्तत्त्वान्तर प्राणोऽध्यात्मकोऽल्पक उच्यते ।
परतन्त्राणीन्द्रियाणि प्राणात्तत्त्वान्तराणि च ॥ ३३ ॥
विभक्ततुर्यपादोऽयं नवाधिकरणात्मक. ।

इति द्वितीयस्याध्यायस्य चतुर्थः पाद ।

अथ साधनाध्यायः

विरतिप्रदबीजस्थविराट्पादार्थ उच्यते ॥ ३४ ॥
लिङ्गेन प्रैति जीवोऽसौ कर्मशेषेण जायते ।
पापिना स्वर्गतिर्नास्ति खादिभावत्वं च्युतस्य न ॥ ३५
व्रीहेः प्राक्स्वाभ्रविलम्बो व्रीह्यादौ श्लेषमात्रता ।
बीजवैश्वानरपदं षट्काधिकरणात्मकम् ॥ ३६ ॥

इति तृतीयस्याध्यायस्य प्रथमः पादः ।

शोध्यतत्त्व पदार्थेऽर्धबीजसूत्रपदुच्यते ।
स्वप्नसृष्टिर्मृषा स्वापे ब्रह्मस्थानसमुच्चयः ॥ ३७ ॥
प्रबुध्यते सुप्त एव मूर्च्छावस्थान्तरं भवेत् ।
नीरूप ब्रह्म नेतीति श्रुत्या नैव निषिध्यते ॥ ३८ ॥
ब्रह्माद्वितीयमाराध्यः सर्वैरीशः फलप्रदः ।
बीजस्थसूत्रचरणमष्टाधिकरणात्मकम् ॥ ३९ ॥

इति तृतीयस्याध्यायस्य द्वितीयः पाद॰ ।

गुणोपसंहारकारी बीजबीजपदुच्यते ।
न शाखाभेदतो भेदो गुणानामुपसंहृति ॥ ४० ॥
भिन्नैवोद्गीथविद्येयमुद्गीथावयवाक्षरम् ।
वसिष्ठत्वादि संहार्यं तथानन्दादयोऽप्यमी ॥ ४१ ॥
ज्ञातव्यः पुरुषः सद्भिरात्मशब्दोऽक्षरात्मकः ।
सदात्मशब्दावेकार्थौ सेवके सा न नग्नता ॥ ४२ ॥
एका शाण्डिल्यविद्येयं नाम्नोरेवं व्यवस्थितिः ।
सम्भृत्यादेरसंहार्यो विद्यैक्यं पुरुषस्य न ॥ ४३ ॥
कर्ममन्त्रौ न विद्याङ्गं संहर्तव्यमुपायनम् ।
विधूननं परित्यागः पुण्यपापे विदा न हि ॥ ४४ ॥
उपासकस्यैव मार्गः सर्वोपास्तेस्तथोत्तरः ।
नियतैव विदा मुक्तिर्निषेधाना तु संहृतिः ॥ ४५ ॥
तयोर्न विद्याभेदोऽस्ति तथोषस्तिकहोलयोः ।
द्वेधा धीर्व्यतिहारे स्यात्सत्यविद्यैकधैव हि ॥ ४६ ॥
दहादेरुपसंहारोऽस्त्यभुक्तावाहुतिर्न हि ।
कर्मस्वनियतोपास्तिः स्थानभेदादयो भिदा ॥ ४७ ॥
मनश्चिदादेः स्वातन्त्र्यं न देहः परमाक्षरम् ।
शाखान्तरेऽङ्गादिधीः स्याद्ध्यातव्यः कृत्स्नशो विराट् ॥ ४८
नानात्वं दहविद्याया विकल्पोऽहंग्रहध्रुवः ।
याथाकाम्यप्रतीकादौ विकल्पेन समुच्चयः ॥ ४९ ॥
षट्त्रिंशदधिकरणं बीजबीजपदीरितम् ।

इति तृतीयस्याध्यायस्य तृतीयः पादः ।

स्थानाङ्गसाधनाकारबीजतुर्यपदुच्यते ॥ ५० ॥
स्वतन्त्रं स्वफले ज्ञानमस्ति तुर्याश्रमान्तरम् ।
त्यजो ब्रह्मात्मनिष्ठा स्याद्धचेयं रसतमादिकम् ॥ ५१ ॥
विद्यास्तावकमाख्यानं न फलेऽन्यमपेक्षते ।
शमाद्यपेक्षा स्वजनौ सर्वान्नानुमतिः क्वचित् ॥ ५२ ॥
सकृत्प्रयोगे यज्ञाना निरभेर्ज्ञानमस्ति हि ।
आश्रमाणा नावरोहो भ्रष्टस्यास्ति विनिष्कृतिः ॥ ५३ ।
शुद्धिरामुष्मिकी नेह ऋत्विजोऽङ्गादिकर्तृता ।
विधेय ध्यानतो मौन शुद्धिर्बाह्य न चोभयम् ॥ ५४ ॥
ज्ञानं जन्मान्तरेऽपि स्यान्मुक्तिः सातिशया न हि ।
बीजतुर्यपदं सप्तदशाधिकरणात्मकम् ॥ ५५ ॥

इति तृतीयस्याध्यायस्य चतुर्थ. पादः ।

अथ फलाध्यायः

जीवन्मुक्तिप्रदस्तुर्यविराट्पादार्थ उच्यते ।
फलान्तं श्रवण कार्यं ग्राह्यं प्रत्यक्परैक्यकम् ॥ ५६ ॥
न प्रतीकेष्वसंदृष्टिस्तत्र कार्या परात्मधीः ।
अर्कादिदृष्टिरङ्गे स्यादासीनः स्यात्समाधिभाक् ॥ ५७ ॥
दिगादिनियमो नास्ति कार्यमामृत्युपासनम् ।
ज्ञानान्न पापलेशोऽस्ति न स पुण्येन लिप्यते ॥ ५८ ॥
नारब्धफलयोर्नाशो नित्यशुद्धिर्न नश्यति ।

साधनं तु फलाधीनं मुक्तिरस्त्यधिकारिणाम् ॥ ५९ ॥
चतुर्दशाधिकरण तुर्यविश्वपदीरितम् ।

इति चतुर्थाध्यायस्य प्रथमः पादः ।

जीवाल्युत्क्रान्तिविषयतुर्यसूत्रपदुच्यते ॥ ६० ॥
वाङ् मानसे मन प्राणे स यात्यस्तं स्वकारणे ।
जीवादयो भूतलय उत्क्रान्तिर्ज्ञाज्ञयोः सम· ॥ ६१ ॥
ज्ञस्य भूतारूपलय· कर्मणो वृत्तितो लयः ।
उत्क्रान्तिप्रतिषेधस्यापादनं देह उच्यते ॥ ६२ ॥
ब्रह्मात्मविद्वरिष्ठाना वागादिविलयः परे ।
विदुष. प्राणपटलं विरूपलयमश्नुते ॥ ६३ ॥
अस्त्युपासकवैशिष्ट्यं याति रश्मीन् मृतो निशि ।
दक्षिणायनमृत्यापि याति विद्याफलं मुनिः ॥ ६४ ॥
एकादशाधिकरणं तुर्यसूत्रपदीरितम् ।

इति चतुर्थस्याध्यायस्य द्वितीयः पादः ।

उत्तरायणमार्गार्हतुर्यबीजपदुच्यते ॥ ६५ ॥
सर्वश्रुतिस्मृतिष्वेको ह्यर्चिरादिमहापथः ।
वायुर्निवेशनीयोऽसौ तथा वारुणिकत्रयम् ॥ ६६ ॥
आतिवाह्यर्चिरादि· स्यादुदङ्मार्गाप्यमक्षरम् ।
प्रतीकालम्बनान्सत्यलोकान्न प्रापयेत्कचित् ॥ ६७ ॥
तुरीयबीजचरण षट्काधिकरणात्मकम् ।

इति चतुर्थस्याध्यायस्य तृतीयः पादः ।

परावरब्रह्मतामिम्तुर्यतुर्यपदुच्यते ॥ ६८ ॥
अनादिसिद्ध कैवल्य मुक्तचमिल तदेव हि ।
सविशेषाविशेषत्वसकल्पो भोग्यसृष्टिकृत ॥ ६९॥
ऐन्छिक तद्देहभावात्सर्वे देहाश्चिदन्विता ।
न स्वातन्त्र्य भवेत्सृष्टौ स्वातन्त्र्य भोगमोक्षयो ॥ ७० ॥
तुरीयतुर्यचरण सप्ताधिकरणात्मकम ।

इति चतुर्थस्याध्यायस्य चतुर्थ पाद ।

सर्वाधिकरणानि द्विनवत्युत्तरयुक् शतम् ॥ ७१ ॥
सूत्राणि पञ्चपञ्चाशदधिपञ्चशतानि हि ।
वासुदेवेन्द्रमच्छिष्यरामचन्द्रेन्द्रयोगिना ॥ ७२ ॥
सूत्रभाष्यार्थसिद्धान्तः सगृहीतो विदा मुदे ।
कृष्णप्रसादाविर्भूतभाष्यसिद्धान्तसग्रह ॥ ७३ ॥
सकृद्दर्शनमात्रेण भाष्यार्थज्ञानदो भवेत ।
तत्रस्थज्ञानविज्ञानसम्यग्ज्ञानादिना मुनि ॥ ७४ ॥
भूत्वा विदेहकैवल्य यात्येवात्र न सशय ।
भाष्यप्रसिद्धसिद्धान्तसग्रह स्यात् त्रिसप्तति ॥ ७५ ॥
श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
ब्रह्मसूत्रब्रह्मतारसिद्धान्तविवृति कृता ॥ ७६ ॥
भाष्यसग्रहसिद्धान्तव्याख्यानग्रन्थविस्तर ।
पञ्चशतोपरिलसत्त्रिसहस्रमितिर्भवेत् ॥ ७७ ॥

APPENDIX

संग्रहसूचनम्

यत्राकारादिपश्यन्तीमात्रापञ्चदशेश्वरा ।
सूच्यन्ते तद्ब्रह्मसूत्राखण्डार्थं त्रैपदं भजे ॥

समन्वयाध्याय

	अधिकरणसूत्राणि	सिद्धान्तसंग्रह
१	अथातो धर्मजिज्ञासा	कर्तव्यम्
२	जन्माद्यस्य यत	ब्रह्मविद्या
३	शास्त्रयोनित्वात्	तच्छास्त्रकृत्त्वात्
४	तत्तु समन्वयात्	ब्रह्मात्मनिष्ठा
५	ईक्षतेर्नाशब्दम्	सन्मात्रम्
६	आनन्दमयोऽभ्यासात्	आनन्दमय.
७	अन्तस्तद्धर्मोपदेशात्	हिरण्मय
८	आकाशस्तल्लिङ्गात्	पुष्करम्
९	अत एव प्राण	असु
१०	ज्योतिश्चरणाभिधानात्	ज्योति
११	प्राणस्तथानुगमात्	प्राण

अकारस्थूलाशाकारमात्राख्याद्यपादस्याधिकरणसंख्या—११

इति वैराजे प्रथम पाद

१.	सर्वत्र प्रसिद्धोपदेशात्	मनोमय
२	अत्ता चराचरग्रहणात्	अत्ता च
३	गुहा प्रविष्टावात्मानौ हि तद्दर्शनात्	गुहास्थौ
४	अन्तर उपपत्ते	अक्षिस्थ
५	अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्	अन्तर्यामी

६	अदृश्यत्वादिगुणको धर्मोक्ते	भूतयोनि
७	वैश्वानर साधारणशब्दविशेषात्	वैश्वानर

अकारसूक्ष्मांशोकारमात्रारूढद्वितीयपादस्याधिकरणसंख्या-

इति वैराजे द्वितीय पाद

१	द्युभ्वाद्यायतन स्वशब्दात्	द्युभ्वाद्याधार
२	भूमा सम्प्रसादादध्युपदेशात्	भूमा
३	अक्षरमम्बरान्तधृते	अक्षरम्
४	ईक्षतिकर्मव्यपदेशात्स	परपूरुष
५	दहर उत्तरेभ्य	आकाश
६	[1] उत्तराच्चेदाविर्भूतस्वरूपस्तु	अक्षिस्थपुरुष
७	अनुकृतेस्तस्य च	तेज
८	शब्दादेव प्रमित	अङ्गुष्ठाकृती
९	तदुपर्यपि बादरायण सम्भवात्	विद्याधिकार
१०	शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि	शूद्र
११	कम्पनात्	प्राण
१२	ज्योतिर्दर्शनात्	ज्योति
१३.	आकाशोऽर्थान्तरत्वादिव्यपदेशात्	आकाश
१४	सुषुप्त्युत्क्रान्त्योर्भेदेन	प्राणवाक्

अकारबीजांशमकारमात्रारूढतृतीयपादस्याधिकरणसंख्या- -१४

इति वैराजे तृतीय पाद

१	आनुमानिकमप्येकेषामिति चेन्न शरीररूपक विन्यस्तगृहीतेर्दर्शयति च	वपुरव्यक्तम्
२	चमसवदविशेषात्	तेजोऽबन्नात्मिका
३	न सङ्ख्योपसंग्रहादपि नानाभावादतिरेकाच्च	प्राणादिपञ्चकम्
४	कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्ते	सार्धैस्त्रिभि.

[1] Here the author differs from S'ri S'amkara

५	जगद्वाचित्वात्	वेदितव्य
६	वाक्यान्वयात्	आत्मशब्द
७	प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्	निमित्तोपादानहेतु
८	एतेन सर्वे व्याख्याता व्याख्याता	विश्वहेतु

अकारतुर्याशार्धमात्रारूढचतुर्थपादस्याधिकरणसख्या—८

इति वैराजे चतुर्थ पाद

इति समन्वयाध्याय समाप्त

अथाविरोधाध्याय

१	स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्न, अन्यस्मृत्यनवकाशदोषप्रसङ्गात्	साख्ययोगस्मृतिभ्याम्
२	एतेन योग प्रत्युक्त	,,
३	न विलक्षणत्वादस्य तथात्व च शब्दात्	ब्रह्मजन्यम्
४	एतेन शिष्टापरिग्रहा अपि व्याख्याता	वेद
५	भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्	नाद्वैतबाधक
६	तदनन्यत्वमारम्भणशब्दादिभ्य	मायात
७	इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्ति	ईशो न दोषभाक्
८	उपसहारदर्शनान्नेति चेन्न क्षीरवद्धि	सर्वस्रष्टृ
९	कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा	चितो न परिणाम
१०	सर्वोपेता च तद्दर्शनात्	ब्रह्म माया
११.	न प्रयोजनवत्त्वात्	प्रयोजनमृते
१२	वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति	समतोज्ज्वलम्
१३	सर्वधर्मोपपत्तेश्च	निर्गुणब्रह्मचैतन्यम्

उकारस्थूलाशबिन्दुमात्रारूढाविरोधाध्यायगतप्रथमपादस्याधिकरणसख्या—१३

इति सूत्रे प्रथम पाद

१	रचनानुपपत्तेश्च नानुमानम्	न प्रधानम्
२	महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्	सृष्टावस्ति
३	उभयथापि न कर्मातस्तदभाव	अणुभ्यो न
४	समुदाय उभयहेतुकेऽपि तदप्राप्ति	न तत्सृष्टत
५	नाभाव उपलब्धे	ज्ञानस्कन्ध
६	नैकस्मिन्नसंभवात्	भङ्ग्या सप्तार्थता
७	पत्युरसामञ्जस्यात्	ताटस्थ्यवाद.
८.	उत्पत्त्यसंभवात्	जीवोत्पत्ते

उकारसूक्ष्माशनादमात्रारूढाविरोधाध्यायगतद्वितीयपादस्याधिकरणसंख्या—८

इति सूत्रे द्वितीय पाद.

१	न वियदश्रुते	ब्रह्मसृष्टौ
२	एतेन मातरिश्वा व्याख्यात	,,
३	असंभवस्तु सतोऽनुपपत्ते	सतो जन्म
४.	तेजोऽतस्तथा ह्याह	वाय्वादिता
५	आपः	अप्
६	पृथिव्यधिकाररूपशब्दान्तरेभ्य	अन्न
७	तदभिध्यानादेव तु तल्लिङ्गात्स	सोपाधिकत्व
८	विपर्ययेण तु क्रमोऽत उपपद्यते च	सृष्टे
९	अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्	सृष्टौ न
१०.	चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्	वपुष
११.	नात्मा श्रुतेर्नित्यत्वाच्च ताभ्य	जीवो नोत्पद्यते
१२	ज्ञोऽत एव	स चिद्दश
१३	उत्क्रान्तिगत्यागत्यादीनाम्	स वै विभु
१४	कर्ता शास्त्रार्थवत्त्वात्	जीव कर्तैव
१५	यथा च तक्षोभयथा	कर्तृत्वमध्यस्तम्
१६.	परात्तु तच्छ्रुते	नियन्तृचित्

१७ अशो नाना व्यपदेशात् अन्यथा चापि दाशकितवादित्वमधीयत एके	त्रिदाम्

उकारबीजाशकलामात्रारूढाविरोधाध्यायगततृतीयपादस्याधिकरणसख्या—१७

इति सूत्रे तृतीय पाद

---

१ तथा प्राणा	ब्रह्मण
२ सप्त गतेर्विशेषितत्वाच्च	अक्षाण्येकादश
३ अणवश्च	तानि मध्यमनामानि
४ श्रेष्ठश्च	प्राणोऽक्षमिव
५ न वायुक्रिये पृथगुपदेशात्	प्राणस्तत्वान्तरम्
६ अणुश्च	प्राणोऽध्यात्मक
७. ज्योतिराद्यधिष्ठान तु तदामननात्	परतन्त्राणि
८ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्	प्राणात्तत्वान्तराणि
९. सज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात	कर्तेश इति

उकारार्धमात्राशकलातीतमात्रारूढाविरोधाध्यायगतचतुर्थपादस्याधिकरणसख्या—९

इति सूत्रे चतुर्थ पाद

अविरोधाध्याय समाप्त

अथ साधनाध्याय

१ तदन्तरप्रतिपत्तौ रहति सपरिष्वक्त प्रश्न-निरूपणाभ्याम्	लिङ्गेन
२ [1]आनर्थक्यमिति चेन्न तदपेक्षत्वात्	कर्मशेषेण
३ अनिष्टाधिकारिणामपि च श्रुतम्	पापिनाम्
४ स्वाभाव्यापत्तिरुपपत्ते	खादिभाक्त्वम्
५. नातिचिरेण विशेषात्	व्रीहे प्राक्
६ अन्याधिष्ठितेषु पूर्ववदाभिलापात्	व्रीह्यादौ

मकारस्थूलाशशान्तिमात्रारूढसाधनाध्यायगतप्रथमपादस्याधिकरणसख्या—६

इति बीजे प्रथम पाद

---

[1] Here the author differs from Sri Samkara

१	सन्ध्ये सृष्टिराह हि	स्वप्नसृष्टि
२	तदभावो नाडीषु तच्छ्रुतेरात्मनि च	स्वापे
३	स एव तु कर्मानुस्मृतिशब्दविधिभ्य	प्रबुध्यते
४	मुग्धेऽर्धसम्पत्ति परिशेषात्	मूर्च्छावस्थान्तरम्
५	न स्थानतोऽपि परस्योभयलिङ्ग सर्वत्र हि	नीरूप ब्रह्म
६	प्रकृतैतावत्त्व हि प्रतिषेधति ततो ब्रवीति च भूय	नेतीति
७	परमत सेतून्मानसम्बन्धभेदव्यपदेशेभ्य	ब्रह्माद्वितीयम्
८	फलमत उपपत्ते	आराध्य सर्वै

मकारसूक्ष्मांशशान्त्यतीतमात्रारूढसाधनाध्यायगतद्वितीयपादस्याधिकरणसख्या—८

इति बीजे द्वितीय पाद

१	सर्ववेदान्तप्रत्यय चोदनाद्यविशेषात्	न शाखाभेदत
२	उपसहारोऽर्थाभेदाद्विधिशेषवत्समाने च	गुणानाम्
३	अन्यथात्व शब्दादिति चेन्नाविशेषात्	भिन्नैव
४	व्याप्तेश्च समञ्जसम्	उद्गीथावयवाक्षरम्
५	सर्वाभेदादन्यत्रेमे	वसिष्ठत्वादि
६	आनन्दादय प्रधानस्य	आनन्दादय
७	आध्यानाय प्रयोजनाभावात्	ज्ञातव्य पुरुष
८	आत्मगृहीतिरितरवदुत्तरात्	आत्मशब्द , सदात्मशब्दौ
९	कार्याख्यानादपूर्वम्	सेवके
१०	समान एव चाभेदात्	एका शाण्डिल्यविद्या
११	सम्बन्धादेवमन्यत्रापि	नाम्नोरेवम्
१२	सम्भृतिद्युव्याप्त्यपि चात	सम्भृत्यादे
१३	पुरुषविद्यायामिव चेतरेषामनाम्नानात्	विद्यैक्यम्
१४	वेधाद्यर्थभेदात्	कर्ममन्त्रौ, संहर्तव्यम्
१५	हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्द-स्तुत्युपगानवत्तदुक्तम्	विधूननम्
१६	साम्पराये तर्तव्याभावात्तथा ह्यन्ये	पुण्यपापे

१७	गतेरर्थवत्त्वमुभयथान्यथा हि विरोध	उपासनस्य
१८	अनियम सर्वासामविरोध शब्दानुमानाभ्याम्	सर्वा ग्रस्ते
१९	यावदधिकारमवस्थितिराधिकारिकाणाम्	नियत
२०	अक्षरधियां त्ववरोध सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्	निषेधाना तु
२१	इयदामननात्	तयोर्न
२२	अन्तरा भूतग्रामवत्स्वात्मन	तथापस्तिकहोल्यो
२३	व्यतिहारो विशिंषन्ति हीतरवत्	द्वेधा धी
२४	सैव हि सत्यादय	सत्यविद्या
२५	कामादीतरत्र तत्र चायतनादिभ्य	दहरे ध्येयसंहार
२६	आदरादलोप	अभुक्तौ
२७	तन्निर्धारणानियमस्तद्दृष्टे. पृथग्घ्यप्रतिबन्ध फलम्	कर्मसु
२८	प्रदानवदेव तदुक्तम्	ध्यानभेदादय
२९.	लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि	मनश्चिदादे
३०	एक आत्मन शरीरे भावात्	न देह
३१	अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्	शाखान्तरे
३२	भूम्न क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति	ध्यानस्य
३३	नाना शब्दादिभेदात्	नानात्वम्
३४	विकल्पोऽविशिष्टफलत्वात्	विकल्प
३५	काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्	काम्यप्रतीकादौ
३६	अङ्गेषु यथाश्रयभाव	विकल्पेन

मकारबीजाशोन्मनीमात्राहृढसाधनाध्यायगततृतीयपादस्याधिकरणसंख्या—३६

इति बीजे तृतीय पाद

१	पुरुषार्थोऽत शब्दादिति बादरायण	स्वतन्त्रम्
२	परामर्श जैमिनिरचोदना चापवदति हि	अस्ति, त्यज

३	स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्	ध्येयम्
४	पारिप्लवार्था इति चेन्न विशेषितत्वात्	विद्यास्तावकम्
५	अत एव चाग्नीन्धनाद्यनपेक्षा	न फले
६.	सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्	शमाद्यपेक्षा
७.	सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्	सर्वान्नानुमति
८	विहितत्वाच्चाश्रमकर्मापि	सकृत्प्रयोगे
९	अन्तरा चापि तु तद्दृष्टेः	निरग्ने
१०	तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः	आश्रमाणाम्
११	न चाधिकारिकमपि पतनानुमानात्तदयोगात्	भ्रष्टस्य
१२	बहिस्तूभयथापि स्मृतेराचाराच्च	शुद्धिरामुष्मिकी
१३	स्वामिनः फलश्रुतेरित्यात्रेयः	ऋत्विजः
१४	सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्	विधेयम्
१५	अनाविष्कुर्वन्नन्वयात्	शुद्धिर्बाह्यम्
१६	ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्	ज्ञानं जन्मान्तरेऽपि
१७	एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः	मुक्तिः सातिशया

मकारार्धमात्राशमनोन्मनीमात्रारूढसाधनाध्यायगतचतुर्थपादस्याधिकरणसंख्या- -१७

इति बीजे चतुर्थः पादः

साधनाध्यायः समाप्तः

अथ फलाध्यायः

१	आवृत्तिरसकृदुपदेशात्	फलान्तम्
२,	आत्मेति तूपगच्छन्ति ग्राहयन्ति च	ग्राह्यम्
३	न प्रतीके न हि सः	न प्रतीकेषु
४	ब्रह्मदृष्टिरुत्कर्षात्	तत्र कार्या
५	आदित्यादिमतयश्चाङ्ग उपपत्तेः	अर्कादिदृष्टिः

६	आसीनः सम्भवात्	आसीनः स्यात्
७	यत्रैकाग्रता तत्राविशेषात्	दिगादिनियमः
८	आप्रायणात्तत्रापि हि दृष्टम्	कार्यमासृति
९	तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्	ज्ञानान्न
१०	इतरस्याप्येवमसंश्लेषः पाते तु	न सः पुण्येन
११	अनारब्धकार्ये एव तु पूर्वे तदवधेः	नारब्धफलयोः
१२	अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्	नित्यशुद्धिः
१३	यदेव विद्ययेति हि	साधनं तु
१४	भोगेन त्वितरे क्षपयित्वा सम्पद्यते	मुक्तिरस्ति

अर्धमात्रास्थूलांशपुरीमात्रारूढफलाध्यायगतप्रथमपादस्याधिकरणसंख्या— १८

इति तुर्ये प्रथमः पादः

१	वाङ्मनसि दर्शनाच्छब्दाच्च	वाङ् मानसे
२	तन्मनः प्राण उत्तरात्	मनः प्राणे
३	सोऽध्यक्षे तदुपगमादिभ्यः	स यात्यस्तम्
४	समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य	उत्क्रान्तिः
५	तदापीतेः संसारव्यपदेशात्	ज्ञस्य
६	प्रतिषेधादिति चेन्न शारीरात्	उत्क्रान्तिप्रतिषेधस्य
७	तानि परे तथा ह्याह	ब्रह्मात्मवित्
८	अविभागो वचनात्	विदुषः प्राणपटलम्
९	तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया	अस्त्युपासकवैशिष्ट्यम्
१०	रश्म्यनुसारी	याति रश्मीन्
११	अतश्चायनेऽपि दक्षिणे	दक्षिणायनमृत्या

अर्धमात्रासूक्ष्मांशमध्यमामात्रारूढफलाध्यायगतद्वितीयपादस्याधिकरणसंख्या—११

इति तुर्ये द्वितीयः पादः

१	अर्चिरादिना तत्प्रथिते	सर्वश्रुतिस्मृतिषु
२.	वायुमब्दादविशेषविशेषाभ्याम्	वायुर्निवेशनीय
३	तटितोऽधि वरुण संबन्धात्	वारुणिकत्रयम्
४	आतिवाहिकस्तल्लिङ्गात्	आतिवाही
५	कार्य बादरिरस्य गत्युपपत्ते	उदङ्मार्गाप्यम्
६	अप्रतीकालम्बनान्नयतीति बादरायण उभयथादोषात् तत्क्रतुश्च	प्रतीकालम्बनान्

अर्धमात्राबीजाशपश्यन्तीमात्रारूढफलाध्यायगततृतीयपादस्याधिकरणसंख्या—६

इति तुर्ये तृतीय पाद

१	सपद्याविर्भाव स्वेनशब्दात्	अनादिसिद्धम्
२	अविभागेन दृष्टत्वात्	मुक्ताभिन्नम्
३	ब्राह्मेण जैमिनिरुपन्यासादिभ्य	सविशेषाविशेषत्वे
४	सङ्कल्पादेव तु तच्छ्रुते	सकल्प
५	अभाव बादरिराह ह्येवम्	ऐच्छिकम्
६	प्रदीपवदावेशस्तथा हि दर्शयति	सर्वे देहा
७	जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च	न स्वातन्त्र्यम्

अर्धमात्रातुर्याशपरामात्रारूढफलाध्यायगतचतुर्थपादस्याधिकरणसंख्या—७

इति तुर्ये चतुर्थ पाद

फलाध्याय समाप्त

वासुदेवेन्द्रसच्छिष्यरामचन्द्रेन्द्रयोगिना ।
सूत्रभाष्यार्थसिद्धान्त सगृहीतो विदा मुदे ॥
भाष्यप्रसिद्धसिद्धान्तसग्रह स्यात् त्रिसप्तति ॥